३कोषातकीवृक्षे राजनि०। घोषातक्यां रत्नमा०। ४प्रमेह-रोगिणां पिडकभेदे सुश्रु०। "तत्र वसामेदोभ्यामभिपन्न-शरीरस्य त्रिभिर्दोषैरनुगतधातोः प्रमेहिणो दश पिडका जायन्ते। तद्यथा शराविका सर्षपिका कच्छपिका जालिनी विनता पुत्रिणी मसूरिका अलजी विदारिका विद्रधिका चेति। शरावमात्रा तद्रूपा निम्नमध्या शराविका१। गौरसर्षपसंस्थाना तत्प्रमाणा च सर्षपी२। सदाहा कूर्मसंस्थाना ज्ञेया कच्छपिका३ बुधैः। जालिनी४ तीव्रदाहा तु मांसजालसमावृता। महती पीडका नीला पिडका विनता५ स्मृता। महत्यल्पाचिता ज्ञेया पिडका सा तु पुत्रिणी६। मसूरसमसंस्थाना ज्ञेया सा तु मसूरिका७। रक्ता सिता स्फोटवती दारुणा त्वलजी८ भवेत्। विदारीकन्दवद्वृत्ता कठिना च विदारिका९। विद्रधेर्लक्षणैर्युक्ता ज्ञेया विद्रधिका१० बुधैः" सुश्रुतः।

**जाली** स्त्री जालमस्त्यस्याः अच् गौरा० ङीष्। १ज्योत्स्न्यां (झिङ्गा) अमरः २पटोले राजनि०। (जालि) ३क्षारके च।

**जाल्म** त्रि० चु० जल—बा० म। १पामरे २क्रूरे ३असमीक्ष्यकारिणि च मेदि० "त्वयि पूजनं जगति जाल्म!" माघः "क्षणं विश्रम्यतां जाल्म! स्कन्धस्ते यदि बाधति। न तथा बाधते स्कन्धो यथा बाधति बाधते" उद्भटः। "जनान् योऽभिभवत्यन्यान् कर्मणा हि स वै पुमान्। नत्वेव जाल्मीं कापालीं वृत्तिमेषितुमर्हसि" भा०शा० १३२ अ० स्वार्थे क। तत्रार्थे "मित्रब्रह्मगुरुद्वेषी जाल्मकः सुविगर्हितः" भा० द्रो० १८३ अ०।

**जाल्य** पु० जल—णत्। शिवे "मत्स्यो जलचरो जाल्योऽकलः केलिकलः कलिः" भा०शा० २८६ अ० शिवस्तुतौ।

**जावन्य** न० जवनस्य भावः दृढा० वा ष्यञ्। वेगे। पक्षे इमनिच् जविमन् पु०, तल् जवनता स्त्री, त्व जवनत्व न० तत्रार्थे। [हेमादौ।

**जावायनि** त्रि० जव+चतुरर्थ्यां कर्णा० फिञ्। जवयुक्त-

**जाषक** न० जाषक+पृषो०। जाषके कालीयनामगन्धद्रव्ये अमरटीकायां संसारसुन्दरी।

**जाष्कमद** पुंस्त्री पक्षिभेदे। "अनिक्लया जाष्कमदा स्टन्धाः श्येनाः पतत्त्रिण" अथ० ११।९।९।

**जास्पति** पु० जायते जन—ड+जायाः दुहितुः पतिः वेदे नि०। जामातरि "सदं मज्जास्पतिं वा" ऋ० १।१८५।८। "जाः पुत्र्यः तासां पतिं जामातरम्" भा०।

**जास्पत्य** न० जाया च पतिश्च जायापती तयोर्भावः कर्म वा ष्यञ् पृषो०। जायापत्योः १कर्मणि "सं जास्पत्यं सुयममा" ऋ० ५।२८।३ "जास्पत्यं जायापत्योः कर्म" भा०। २तद्भावे च।

**जाहक** पु० दह—ण्वुल् पृषो०। (घेङ्गु) इति ख्याते १खगे, २मार्जारे, ३खट्वायां ४कारण्डिकायां मेदि०। ५विलेशये जन्तुभेदे राजनि० "जाहकाहिशशकेडुगोधानां कीर्त्तनं शुभम्" वृहत्सं० ८५ अ०।

**जाहुष** पु० राजभेदे "परिविष्टं जाहुषं विश्वतः" ऋ० १।११६।२०। "जाहुषः कश्चित् राजा" भा०।

**जाह्नवी** स्त्री जह्नु+अण् ङीप्। "जानुद्वारा पुरादानीं जह्नुः संपीय कोपनः। तस्य कन्यास्वरूपा च जाह्नवी तेन कीर्त्तिता" इत्युक्तनिर्वचनायां गङ्गायाम्। जह्नुशब्दे ३०८१पृ० दृश्यम् "ज्यैष्ठे मासि सिते पक्षे दशम्यां हस्ते शैलान्निरगमद्यं जाह्नवी मर्त्यलोकम्" ति०त० शङ्खः तस्यां तिथिविशेषे स्नानफलं यथा "सामान्यदिवसस्नानसङ्कल्पं शृणु सुन्दरि!। पुण्यं दशगुणञ्चैव मौषलस्नानतः परम्। ततस्त्रिंशद्गुणं पुण्यं रविसंक्रमणे दिने। अमायाञ्चापि तत्तुल्यं द्विगुणं दक्षिणायने। ततो दशगुणं पुण्यं नराणामुत्तरायणे। चातुर्मास्यां पौर्णमास्यामनन्तं पुण्यमेव च। अक्षयायाञ्च तत्तुल्यमेतद्वेदनिरूपितम्। असंख्यपुण्यफलदमेतेषु स्नानदानकम्। सामान्यदिवसस्नानात् दानात् शतगुणं भवेत्। मन्वन्तरायां देवेशि! युगाद्यायां तथैव च। माघस्य सितसप्तम्यां भीष्माष्टम्यां तथैव च। ततोऽपि द्विगुणं पुण्यं नन्दायां भवदुर्लभे!। दशहरादशम्याञ्च युगाद्यादिसमं फलम्। नन्दासमञ्च वारुण्यां महत्पूर्वे चतुर्गुणम्। ततश्चतुर्गुणं पुण्यं त्रिमहत्पूर्वके सति!। पुण्यं कोटिगुणञ्चैव सामान्यस्नानतो हि यत्। चन्द्रोपरागसमये सूर्ये दशगुणं ततः। पुण्यं त्वर्द्धोदये काले ततः शतगुणं फलम्। सर्वेषामेव सङ्कल्पं वैष्णवानां विपर्ययः" इति ब्रह्मवै० प्रकृतिख०। "अनुरयतूला जलधिम जाह्नवी" माघः।

**जि** जये अभिभवे भ्वा० पर० सक० अनिट्। जयति अजैषीत् जिगाय जिग्यतुः जिगयिथ जिगेथ। जेता जीयात् जेष्यति। जापयति-ते अजीजपत्-त। जिगीषति। जेता जयी जितः जयः। "जयत्यतिबलो रामो लक्ष्मणश्च महाबलः। राजा जयति सुग्रीवो राघवेणाभिपालितः" रामा० बहुलत्वः प्रयोगः। "सर्वद्रव्याणि कुप्यञ्च यो यज्जयति तस्य तत्" मनुः। "दुर्योधनो द्रौपदि! त्वामजै-